**C**

**SL. No. : N**

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 63 ]
Total No. of Questions : 63 ]

**CCE PR REVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

ಸಂಕೇತ ಸಂಖ್ಯೆ: **16-S**

**Code No. : 16-S**

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : First Language — SANSKRIT

# प्रथम भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Repeater )**

ದಿನಾಂಕ : 22. 06. 2018 ]
ಸಮಯ : ಬೆಳಿಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-45 ರವರೆಗೆ ]
ಗರಿಷ್ಠ ಅಂಕಗಳು : 125 ]

[ Date : 22. 06. 2018
[ Time : 9-30 A.M. to 12-45 P.M.
[ Max. Marks : 125

***ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 63 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***छात्रं प्रति सामान्यनियमाः***

1. अस्मिन् प्रश्नपत्रे त्रिषष्टिः (63) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तय । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति पर्यालोचय ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकतयाः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारिता समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । यस्मिन् पञ्चदशपलानि प्रश्नपत्रस्य पठनार्थं निर्धारितानि सन्ति ।



इतः कर्तय

**TEAR HERE TO OPEN THE QUESTION PAPER**
**प्रश्नपत्रमुद्घाटयितुमितः कर्तय**

**Tear here**

## भागः - A

**( गद्य-पद्य-पूरकपाठाः )**

**( 79 अङ्काः )**

I. एकवाक्येन उत्तरं लिखत — 16 × 1 = 16

1. सत्यव्रतशास्त्रिमहाभागः कुत्र अजायत ?
2. चन्नम्मा कस्य भार्या ?
3. कापालिकः कथम् आसीत् ?
4. तृषितः चकोरः कम् आश्रयति ?
5. चतुर्विधपुरुषार्थेषु अन्तिमः कः ?
6. कीदृशम् औषधं दुर्लभम् ?
7. नाट्यस्य गरिमाणं कः अवर्णयत् ?
8. मानवः कथं निर्वेदम् आदत्ते ?
9. के मुहुर्मुहुः परिभवं प्राप्नुवन्ति ?
10. रमणमहर्षेः सहजानि आभरणानि कानि ?
11. सिन्धुलस्य पुत्रः कः ?
12. इन्द्रः कस्य तपोवनं वव्राज ?
13. भिषजः रोगनिदानं कथं जानान्ति ?
14. सन्तुष्टः भगवान् विष्णुः किम् अकरोत् ?
15. रमणमहर्षेः पिता कः ?
16. भारतीयाः कथं भिन्नमार्गमाश्रिताः ?

II. चतुर्थपदं लिखत — 4 × 1 = 4

17. कर्णस्य सूतः :: शल्यराजः ; कर्णस्य गुरुः — .........................।
18. दुर्योधनः :: धीरोद्धतः ; श्रीकृष्णः — ........................... ।
19. प्रसन्नात्मेन्द्रियमनाः — स्वस्थः ; क्रियाः सर्वाः — ........................... ।
20. कीर्तिकायः — शिवाजिप्रभुः ; अभयदायिनी — ........................... ।

III. लघूत्तराणि संस्कृतभाषया लिखत — 5 × 2 = 10

21. पादपजातयः काः ? तासां जन्म कथं भवति ?

22. संस्कृतभाषाविषये डा० सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?

23. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

24. नाट्ये कति रसाः सन्ति ? ते के ?

**अथवा**

आतोद्ये कति विधानि सन्ति ? तानि कानि ?

25. अस्थियाचकम् इन्द्रं दधीचिः सानन्दं किम् अवदत् ?

IV. श्लोकतात्पर्यं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत — 3 × 2 = 6

26. यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।

27. एष मातुर्वियोगाच्च क्षुधया च भृशार्दितः ।
रुरोद शिशुरत्यर्थं शिशुः शरवणे यथा ।।

**अथवा**

ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि ।
फलं मत्वा हस्तिराजमभिदुद्राव मारुतिः ।।

28. धीरोद्धतो धीरललितो धीरोदात्तस्तथैव च ।
धीरप्रशान्तश्चैवेति नायकाः नाटकाश्रयाः ।।

V. कव्योः देश-काल-कृतीनां विषये लिखत — 2 × 3 = 6

29. डा० के०एस० नागराजन् ।

30. भासः ।

VI. यथानिर्देशम् उत्तरं लिखत — 3 × 3 = 9

31. 'लीलावती' इति ग्रन्थे बहवः विषयाः निरुपिताः खलु ?
कः पाठः ? का वदति ? कस्य ग्रन्थः एषः ?

32. किन्तु भवन्तं परिश्रान्तं पश्यामि ।
कः पाठः ? का अवदत् ? अत्र परिश्रान्तः कः ?

**अथवा**

शरणागतरक्षणं धर्मः, इति अस्माकं श्रद्धा ।
कः पाठः ? का अवदत् ? शरणागतः कः ?

33. "जग्राह सहसा रविम् ।"
कः पाठः ? कः अवदत् ? कम् अवदत् ?

VII. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 4 × 4 = 16

34. भीष्मयुधिष्ठिरयोः संवादं पद्यानुगुणं संगृह्य लिखत ।

35. ब्रह्मदेवः वृत्रवधोपायं ज्ञातुम् आगतान् देवान् किम् अवदत् ?

**अथवा**

तपोधनः दधीचिः 'त्यागधनः' इति कथं प्रसिद्धः अभवत् ? विवृणुत ।

36. "भारतं सरक्षितुं सन्नद्धः योद्धा हिमवान्" कथम् ? इति विवृणुत ।

37. संस्कृतसाहित्यक्षेत्रे ज्ञानपीठप्रशस्तिपुरस्कृतः कः ? तस्य बाल्यजीवनं विवृणुत ।

VIII. श्लोकपूरणं कुरुत – 2 × 4 = 8

38. पिबन्ति ..............................................................................

..............................................................................।

..............................................................................

.............................................................................. विभूतिः ।।

39. मनीषिणः ..............................................................................

..............................................................................।

..............................................................................

.............................................................................. दुर्लभम् ।।

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत – 4 × 1 = 4

40. पुरा सूर्यान्वये सगरो नाम नृपः आसीत् ? सः एकदा अश्वमेधयागं कर्तुं निश्चित्य अश्वम् अमुञ्चत् । इमं विषयं ज्ञात्वा इन्द्रः तम् अश्वम् अपहृतवान् । तदनन्तरम् अश्वं पातालं नीत्वा कपिलमहर्षेः आश्रमे अत्यजत् । अनन्तरं सगरपुत्राः अश्वम् अन्विष्यन्तः भूमिं खनित्वा पातालम् अगच्छन् । तत्र कपिलमहर्षिः तपोनिरतः अभवत् । आश्रमे चरन्तम् अश्वं दृष्ट्वा 'कपिलः एव चोरः' इति मत्वा तं मुनिम् अपीडयन् । कुपितेन कपिलेन नेत्रे उन्मीलिते सति सर्वे सगरपुत्राः भस्मीभूताः अभवन् । "अविवेकः परमापदां पदम्" इति नीतिः अनया कथया ज्ञायते ।

i) सूर्यान्वये कः नृपः आसीत् ?

ii) कः अश्वम् अपहृतवान् ?

iii) सगरपुत्राः अश्वम् अन्विष्यन्तः कुत्र अगच्छन् ?

iv) अनया कथया का नीतिः ज्ञायते ?

# भागः - B

## (व्याकरणविभागः)

### (30 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकं चत्वारः विकल्पाः प्रदत्ताः । तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । सम्यक् उत्तरस्य चयनं कृत्वा लिखत — 10 × 1 = 10

41. 'पतिः' अस्य स्त्रीलिङ्गपदम् इदं भवति —
    (A) भर्ता (B) पत्नी
    (C) भगिनी (D) माता ।

42. 'तव' इत्यत्र एषा विभक्तिः अस्ति —
    (A) पञ्चमी (B) द्वितीया
    (C) सप्तमी (D) षष्ठी ।

43. 'यतिष्ये' अत्र एषः लकारः अस्ति —
    (A) लिट् (B) लोट्
    (C) लृट् (D) लङ् ।

44. 'मयूरो नृत्यति' इत्यत्र विसर्गस्थाने अयम् आदेशः भवति —
    (A) लोपादेशः (B) उकारादेशः
    (C) रेफादेशः (D) सकारादेशः ।

45. नद्यः <u>समुद्रे</u> अस्तं गच्छन्ति । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति —
    (A) कदा (B) कथम्
    (C) कति (D) कुत्र ।

46. 'प्रकाशः' इत्यस्य विरुद्धार्थकपदम् एतत् भवति —
    (A) तेजः (B) कान्तिः
    (C) तमः (D) किरणः ।

47. अत्र व्याकरणशुद्धं वाक्यम् इदं भवति —
    (A) सुयोधनः भीमात् क्रुध्यति (B) सुयोधनः भीमाय क्रुध्यति
    (C) सुयोधनः भीमे क्रुध्यति (D) सुयोधनः भीमेन क्रुध्यति ।

48. 'चक्षुः' एतस्य समानार्थकपदम् एतत् भवति —
    (A) नयनम् (B) पाणिः
    (C) शिरः (D) चरणः ।

49. 'यस्योभयम्' अत्र सन्धिविच्छेदः एवं भवति —
    (A) यस्यो + भयम् (B) यस्य + उभयम्
    (C) यस्यो + अभयम् (D) यस्य + अभयम् ।

50. 'रक्ष' इत्यत्र एषः पुरुषः अस्ति —
    (A) प्रथमपुरुषः (B) उत्तमपुरुषः
    (C) मध्यमपुरुषः (D) अन्यपुरुषः ।

51. विग्रहवाक्यं विलिख्य समासनाम लिखत – 2 × 1 = 2

a) यथाक्रमम्

b) देवासुराः ।

**अथवा**

समस्तपदं विलिख्य समासनाम लिखत –

a) फाले चन्द्रः यस्य सः ।

b) अन्यः देशः ।

52. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – 2 × 1 = 2

a) छात्रः अध्येतुं पाठशालां गच्छति ।

b) माता क्षीरम् आनीतवती ।

53. प्रयोगपरिवर्तनं कुरुत – 2 × 1 = 2

a) कपयः फलानि खादन्ति ।

b) मया जलं पीतम् ।

54. सन्धिं विभज्य नाम लिखत – 2 × 1 = 2

a) भूरियम्

b) एतदुपरि ।

55. लिङ्गविभक्तिवचनानि लिखत – 2 × 1 = 2

a) भाषायाम्

b) कस्य ।

56. लकारपुरुषवचनानि लिखत – 2 × 1 = 2

a) अवर्णयत्

b) ब्रवीमि ।

57. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत – 2 × 1 = 2

a) <u>शक्रः</u> महत्तरां भिक्षां याचते ।

b) भाग्यानि <u>काले</u> फलन्ति ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत – 3

58. मधुरं मधु पीयूषं तस्मात्तस्मात् कवेर्वचः ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत – 3

59. भूतेषु किं च करुणां बहुलीकरोति ।

# भागः - C

## (रचनाविभागः)

## (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत — 3

60. ಭಾರತ ದೇಶದಲ್ಲಿ ಅನೇಕ ನದಿಗಳು ಹರಿಯುತ್ತವೆ. ಉತ್ತರ ಭಾರತದ ನದಿಗಳಲ್ಲಿ ಗಂಗಾನದಿಯೂ ಒಂದು. ಇದು ಭಾರತದ ಪುಣ್ಯನದಿಯಾಗಿರುತ್ತದೆ.

Many rivers flow in India. River Ganga is one among the rivers of North India. It is the holy river of India.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत – 3

61. अधुना नगरेषु वायुमालिन्यम् अधिकं भवति । तस्मात् जनाः रोगिणः भवन्ति । अतः सर्वे जनाः वायुमालिन्यनिवारणार्थं प्रयत्नं कुर्युः ।

XV. पत्रं लिखत – 5

62. शिवमोग्गा नगरस्य आदर्श प्रौढशालायाः अभिषेकः/अभिनया इति मत्वा भगिन्याः विवाहोत्सवे भागं गृहीतुं दिनद्वयं विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति विरामपत्रं लिखत ।

**अथवा**

'रघुवंशम्' इति पुस्तकं प्रेषयितुं निवेद्य देहलीनगरस्य 'सरस्वती' प्रकाशनस्य व्यवस्थापकं प्रति पत्रं लिखत ।

XVI. 63. एकं विषयम् अधिकृत्य प्रबन्धं लिखत – 5

i) सङ्गणकयन्त्रम्

ii) स्त्रीशिक्षणम्

iii) स्वातन्त्र्योत्सवः ।